

# शिव अष्टोत्तर शत नाम स्तोत्रम्-शिवो महेश्वरश्शंभुः पिनाकी

https://www.chalisa.online

|| शिव अष्टोत्तर शत नाम स्तोत्रम् ||

शिवो महेश्वरश्शंभुः पिनाकी शशिशेखरः
वामदेवो विरूपाक्षः कपर्दी नीललोहितः ॥ 1 ॥
शंकरश्शूलपाणिश्च खट्वांगी विष्णुवल्लभः
शिपिविष्टोंबिकानाथः श्रीकंठो भक्तवत्सलः ॥ 2 ॥
भवश्शर्वस्त्रिलोकेशः शितिकंठः शिवप्रियः
उग्रः कपाली कामारी अंधकासुरसूदनः ॥ 3 ॥
गंगाधरो ललाटाक्षः कालकालः कृपानिधिः
भीमः परशुहस्तश्च मृगपाणिर्जटाधरः ॥ 4 ॥
कैलासवासी कवची कठोरस्त्रिपुरांतकः
वृषांको वृषभारूढो भस्मोद्धूलितविग्रहः ॥ 5 ॥
सामप्रियस्स्वरमयस्त्रयीमूर्तिरनीश्वरः
सर्वज्ञः परमात्मा च सोमसूर्याग्निलोचनः ॥ 6 ॥
हविर्यज्ञमयस्सोमः पंचवक्त्रस्सदाशिवः
विश्वेश्वरो वीरभद्रो गणनाथः प्रजापतिः ॥ 7 ॥
हिरण्यरेतः दुर्धर्षः गिरीशो गिरिशोनघः
भुजंगभूषणो भर्गो गिरिधन्वी गिरिप्रियः ॥ 8 ॥
कृत्तिवासः पुरारातिर्भगवान् प्रमथाधिपः
मृत्युंजयस्सूक्ष्मतनुर्जगद्व्यापी जगद्गुरुः ॥ 9 ॥
व्योमकेशो महासेनजनकश्चारुविक्रमः
रुद्रो भूतपतिः स्थाणुरहिर्भुध्नो दिगंबरः ॥ 10 ॥
अष्टमूर्तिरनेकात्मा सात्त्विकश्शुद्धविग्रहः
शाश्वतः खंडपरशुरजः पाशविमोचकः ॥ 11 ॥
मृडः पशुपतिर्देवो महादेवोऽव्ययो हरिः
पूषदंतभिदव्यग्रो दक्षाध्वरहरो हरः ॥ 12 ॥
भगनेत्रभिदव्यक्तो सहस्राक्षस्सहस्रपात्
अपवर्गप्रदोऽनंतस्तारकः परमेश्वरः ॥ 13 ॥
एवं श्री शंभुदेवस्य नाम्नामष्टोत्तरंशतम् ॥

|| https://www.chalisa.online ||